प्राणिसम्बन्धिनि बलादौ। "व्यानवस्य त्वत्सवे गयम्" ऋ०७,१८,१३। "आनोः सम्बन्धिनो बलस्य" भा०। "चिद्वचस आनवाय" ऋ०६,६२,९ स्त्रियां ङीप्।

**आनव्य** न० आनोर्नरस्य इदं यत्। नरसम्बन्धिनि तन्त्रोक्ते मलद्वये। "मायिकं नाम योषोत्थम् पौरुषं कार्म्मणं मलम्। आनव्यं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्रयम्" तन्त्रसारे प्रपञ्चसारः।

**आनस** त्रि० अनसः शकटस्य पितुर्वा इदम् अण्। १शकटसम्बन्धिनि। "इयानि वै यानस्यत्यानि चक्राणि रथ्यानि चानसानि" शत०ब्रा०। २पितृसम्बन्धिनि च।

**आनाथ्य** न० अनाथस्य भावः ष्यञ्। स्वामिशून्यत्वे।

**आनाम्य** त्रि० आ+नम—कर्म्मणि ण्यत् अनिट्कत्वात् न ह्रस्वः। नमस्कार्य्ये।

**आनाय** पु० आनीयते मत्स्योऽनेन आ+नी—करणे "जालमानायः" पा० उक्तेः घञ्। मत्स्यधारणार्थे शणसूत्रादिनिर्म्मिते जाले। अन्यत्र अच्। आनय इत्येव।

**आनायिन्** त्रि० आनयति आ+नी—णिनि। १देशाद्देशान्तरप्रापके। आनायो जालमस्यास्ति आनाय+इनि। २जालिके धीवरे "आनायिभिस्तामपकृष्टनक्राम्" "आनायिनस्तद्विचये नदीष्णान्" इति च रघुः। उभयत्र स्त्रियां ङीप्।

**आनाय्य** पु० आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ आ+नी—ण्यत् नि० आयादेशः। वैदिकप्रसिद्धे दक्षिणाग्निभेदे। "आनाय्योऽनित्ये" पा० "दक्षिणाग्निविशेष एवेदं निपातनम् स हि गार्हपत्यादानीयतेऽनित्यश्च सततमप्रज्वलनात् वैश्यादिकुलयोनिकत्वेन वैकल्पिकत्वाच्च। अन्यत्र तु यत् आनेयो घटादिः" सि०कौ० वैश्यकुलादेरानीतो दक्षिणाग्निस्तु आनेय एव "वैश्यकुलात् वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद्वा" आश्व०सूत्रे अग्नियोनिविकल्पश्रवणात् गार्हपत्यादानेयस्यैव आनाय्यत्वं नान्यस्य।

**आनाह** पु० आ+नह–घञ्। १बन्धे २दैर्घ्ये आनह्यते अपसरणप्रतिरोधेन बध्यते विण्मूत्रादि अनेन आ+नह+करणे घञ्। ३विण्मूत्ररोधसाधने वैद्यकोक्ते रोगभेदे "आमं शकृद्वा निचितं क्रमेण भूयोविबद्धम् विगुणानिलेन। प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति" मा०नि०। वातादिदोषादुक्ता स्थानविशेषाश्रयत्वेन तेषां रोगविशेषजनकत्वमुक्तं सुश्रु०। "अत ऊर्द्ध्वं स्थानसंश्रयं वक्ष्यामः। एवं कुपितास्तांस्तान् शरीरप्रदेशानागत्य तांस्तान् व्याधीन् जनयन्ति। ते यदोदरसन्निवेशं कुर्व्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गानाहविसूचिकातिसारप्रभृतीन् जनयन्ति"। "आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम्। पितरं दुःखितं दृष्ट्वा सुकन्येदमथाब्रवीत्" भा०व०प०१२२अ०।

**आनाहिक** पु० आनाहे तत्प्रतीकारे विहितः ठक्। आनाहरोगोपशमनीये विधौ। "आस्थापनं मारुतजे, स्निग्धे स्निग्धे विशिष्यते। पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत्" सुश्रु०।

**आनिचेय** त्रि० समन्तान्निचीयते आ+नि+चि–कर्म्मणि यत्। समन्तात् सञ्चयनीये स्त्रियां शार्ङ्ग०पाठात् ङीन्।

**आनिरुद्ध** पुंस्त्री० अनिरुद्धस्यापत्यम् वृष्णित्वात् अण्। अनिरुद्धस्य उषापतेरपत्ये स्त्रियां ङीप्। निरुद्धभिन्नस्यापत्ये तु इञ्। आनिरुद्धिरित्येव।

**आनिर्हत** पु० अनिर्हत एव स्वार्थे अण्। देवहृदयतया प्रधाने देवभेदे "नम आनिर्हतेभ्य इत्येते ह्येभ्यो लोकेभ्यो ऽनिर्हताः" शत०ब्रा० "एतानि देवहृदयानि यथा हृदयं प्रधानं तथैतेऽपि प्रधानानि" भा०।

**आनिल** त्रि० अनिलस्येदम् अण्। १वायुसम्बन्धिनि अनिलो देवताऽस्य अण्। २वायुदेवताके हविरादौ स्त्रियामुभयत्र ङीप्। सा च स्वातितारायाम् सा हि अनिलाधिष्ठातृका

**आनिलि** पु० अनिलस्यापत्यम् इञ्। भीमे स हि पाण्डोः क्षेत्रे कुन्त्यां वायुनोत्पादितः यथा "ततस्तयोक्ता भर्त्रा तु वायुमेवाजुहाव सा। ततस्तामागतो वायुर्मृगारूढो महाबलः। किन्ते कुन्ति! ददाम्यद्य ब्रूहि यत्ते हृदि स्थितम्। सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम!। बलवन्तं महाकायं सर्वदर्पप्रभञ्जनम्। तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः" भा०आ०प० १२३ अ०। २हनूमति च तस्य केशरिक्षेत्रे अञ्जनायां वायुना जनितत्वात् तथात्वम् तत्कथा संक्षिप्ता यथा "अहं केशरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्ष! हनूमान्नाम वानरः" भा०व०प० १४०अ०। भीमं प्रति हनूमद्वाक्यम्। अत एव तयोः क्षेत्रभिन्नोत्पन्नत्वेऽपि एकेनोत्पादनात् भ्रातृत्वम् तेन "तद्रूपं दर्शयामास यद्वै सागरलङ्घने। भ्रातुः प्रियमभीप्सन् वै चकार सुमहद्वपुः" "भ्राता मम गुणश्रेष्ठो बुद्धिसत्त्वबलान्वितः रामायणेऽतिविख्यातः श्रीमान् वानरपुङ्गवः" इति च तत्रैवाध्याये तयोर्भ्रातृत्वेनोक्तिः। अनिलसुतादयोऽप्युभयत्र।

**आनीत** त्रि० आ+नी—कर्म्मणि क्त। देशाद्देशान्तरं नीते।